# 513258

Seat No.________

## M. A. (Part–II) Examination

April / May – 2003

## Sanskrit : Paper – V

***(Subsidiary) (New Course)***

*(१) कादम्बरी (नियतांशः) (२) किरातार्जुनीयम् (१–२ सर्गौ)*

Time : **3** Hours] [Total Marks : **100**

१ (ક) નીચેનામાંથી ગમે તે **બે** પરિચ્છેદનો અનુવાદ કરો : १६

**1** (a) Translate any **two** of the following passages : **16**

(१) यश्च मनसि धर्मेण कोपे यमेन प्रसादे धनदेन प्रतापे वह्निना भूजे भुवा दृशि श्रिया वाचि सरस्वत्या मुखे शशिना बले मरुता प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा च वसतासर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य। यस्य च हृदयस्थितानपि पतीन्दिधक्षुरिव प्रतापानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल। यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकरा रतेषु केशग्रहाः काव्येषु दृढबन्धाः शास्त्रेषु चिन्ता स्वप्नेषु विप्रलम्भाः छत्रेषु कनकदण्डा ध्वजेषु प्रकम्पा गीतेषु रागविलसितानि करिषु मदविकाराश्चापेषु गुणच्छेदा गवाक्षेषु जालमार्गाः शशिकृपालकवचेषु कलङ्का रतिकलहेषु दूतसंप्रेषणानि शार्यक्षेषु शून्यगृहा प्रजानामासीत्॥

(२) एकदा तु प्रभातसंध्यारागलोहिते गगनतलकमलिनीमधुरक्तपक्षसंपुटे वृद्धहंस इव मन्दाकिनीपुलिनादपरजलनिधितटमवतरति चन्द्रमसि, परिणतरंकुरोमपाण्डुनि व्रजात विशालतामाशाचक्रवाले, गजरुधिररक्तहरिसटालोमलोहिनीभिरातप्तलाक्षिकतन्तुपाटलाभिरायामिनी–भिरशिशिरकिरणदीधितिभिः पद्मरागरत्नशलाकासंमार्जनीभिरिव समुत्सार्यमाणे गगनकुट्टिमकुसुमप्रकरे तारागणे, संध्यामुपासितुमुत्तराशा–वलम्बिनिमानससरस्तीरमिवावतरति सप्तर्षिमण्डले, मन्दमन्दसंचारिणि प्रवाति प्राभातिके मातरिश्वनि, रतस्ततः संचरत्सु वनचरेषु, क्रमेण च गगनतलमार्गमवतरतो दिवसकरवारणस्यावचूलचामरकलाप इवोपलक्ष्यमाणे मञ्जिष्ठारागलोहिते किरणजाले, शनैः शनैरुदिते भगवति सवितरि सहसैव तस्मिन्महावने संत्रासितसकलवनचरः कम्पयन्निव तरून् भगीरथावतार्यमाणगंगाप्रवाहकलकलबहलो भीतवनदेवताकर्णितो मृगया कोलाहलध्वनिरुदचरत्॥

(३) अस्ति सकलत्रिभुवनललामभूता, प्रसवभूमिरिव कृतयुगस्य, आत्मनिवासोचिता भगवता महाकालाभिधानेन भुवनत्रयसर्गस्थिति–संहारकारिणा प्रमथनाथेनापरेव पृथिवी समुत्पादिता, द्वितीयपृथिवीशङ्कया च जलनिधिनेव रसातलगम्भीरेण जलपरिखावलयेन परिवृता, रामाराधननिपुणेन शत्रुघ्नेनेवाविष्कृतभरतपरिचयेन दिवसेनेव मित्रानुवर्तिना बौद्धेनेव सर्वास्तिवादशूरेण सांख्यागमेनेव प्रधानपुरुषोपेतेन जिनधर्मेणेव जीवानुकम्पिना विलासिजनेनाधिष्ठिता, सशैलेव प्रासादैः, सकल्पवृक्षेव सत्पुरुषैः, दर्शितविश्वरूपेव चित्रभित्तिभिः संध्येव पद्मरागानुरागिणी, अमराधिपमूर्तिरिव मखशतानलधूमपूता, पशुपतिलास्यक्रीडेव सुधाधवलाट्टहासा, बहुप्रकृतिरपि स्थिरा विजितामरलोकद्युतिरवन्तीषूज्जयिनी नाम नगरी॥

(४) सहजा चास्याजस्रमभ्यस्यतो वृकोदरस्येव शैशव एवाविर्बभूव सर्वलोकविस्मयजननी महाप्राणता। यदृच्छया क्रीडताप्यनेन करतलाव–लम्बितकर्णपल्लवावनताङ्गाः सिंहकिशोरक्रमाक्रान्ता इव गजकलभकाश्च–लितुमपि न शेकुः। एकैकेन कृपाणप्रहारेण बाल एव तालतरून्मृणाल–दण्डानिव लुलाव। दशपुरुषसंवाहनयोग्येन चायोदण्डेन श्रममकरोत्। ऋते च महाप्राणतायाः सर्वाभिरन्याभिः कलाभिरनुचकार तं वैशम्पायनः। चन्द्रापीडस्य तु सकलकलाकलापपरिचयबहुमानेन शुकनासगौरवेण सहपांशुक्रीडनतया सहसंवृद्धतया च सर्वविश्रम्भस्थानं द्वितीयमिव हृदयं वैशम्पायनः परं मित्रमासीत्। निमेषमपि तेन विना स्थातुमेकाकी न शशाक। वैशम्पायनोऽपि तमुष्णकरमिव वासरोनुगच्छन्न क्षणमपि विरहयाचंकार॥

(ख) નીચેનામાંથી ગમે તે **ત્રણ** સસંદર્ભ સમજાવો : ૯

(b) Explain with context any **three** of the following : **9**

(१) मां तु लब्धजीविताशं प्रत्यग्रपितृमरणशोकशुष्कहृदयं बलवती पिपासा परवशमकरोत्।

(२) स्वस्यैवाविनयस्य फलमनेनानुभूयत इत्यवोचत्।

(३) महाभारते वाच्यमाने श्रुतमपुत्राणां किल न सन्ति लोकाः।

(४) अलब्धवैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयी कथा।

(५) मन्ये च मातङ्गजातिस्पर्शदोषभयादस्पृशतेयमुत्पादिता प्रजापतिना।

(६) अत्र हि शाश्वतिकमपहाय विरोधं तिर्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति।

२ નીચેનામાંથી ગમે તે **બે** વિશે વિવેચનાત્મક નોંધ લખો : ૧૪

**2** Write critical notes on any **two** of the following : **14**

(૧) જાબાલિના આશ્રમનું વર્ણન

(1) Description of the hermitage of Jābāli

(૨) રાજા શૂદ્રકનું પાત્રાંકન

(2) Character-sketch of the king 'S'ūdraka'

(૩) કાદમ્બરીના પ્રાસ્તાવિક શ્લોકો

(3) Introductory stanzas of the Kādambarī

(૪) કાદમ્બરીમાં પ્રકૃતિ-નિરૂપણ

(4) Description of nature in the Kādambarī

૩ કથા અને આખ્યાયિકાનાં લક્ષણો આપીને, કાદમ્બરીનું ગદ્યકાવ્ય તરીકે મૂલ્યાંકન કરો. **૧૧**

**3** Give the characteristics of Kathā and Ākhyāyikā; and evaluate the Kādambarī as a prose romance. **11**

**અથવા / OR**

૩ બાણની કાદમ્બરીના આધારે સમાજદર્શન આલેખો. **૧૧**

**3** Draw the view of the society on the basis of Bāṇa's Kādambarī. **11**

૪ (ક) નીચેનામાંથી ગમે તે **ચાર**નો અનુવાદ કરો : **૧૬**

**4** (a) Translate any **four** of the following : **16**

(१) द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञानमधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥

(२) पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतमंगलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥

(३) कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः॥

(४) अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः॥

(५) स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥

(६) अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः।
अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते॥

(७) श्रुतमप्यधिगम्य ये रिपून्विनयन्ते न शरीरजन्मनः।
जनयन्त्यचिराय संपदामयशस्ते खलु चापलाश्रयम्॥

(८) विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः॥

(ખ) નીચેનામાંથી ગમે તે **ત્રણ** સસંદર્ભ સમજાવો : ૯

(b) Explain giving context any **three** of the following : **9**

(१) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।

(२) अहो दुरन्ता बलवद् विरोधिता।

(३) अभिभूतिभयादसूनुतः सुखमुज्झन्ति न धाम मानिनः।

(४) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

(५) सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि।

(६) प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया।

(७) ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः।

૫ નીચેનામાંથી ગમે તે **બે** વિશે વિવેચનાત્મક નોંધ લખો : ૧૪

**5** Write critical notes on any **two** of the following : **14**

(૧) વનેચરની ઉક્તિ

(1) The speech of 'Vanechar'

(૨) ભારવિની વિદ્વત્તા

(2) Scholarship of Bhāravi

(૩) યુધિષ્ઠિરનું વ્યક્તિત્વ

(3) Character sketch of Yudhishthir

(૪) કિરાતાર્જુનીય - એક અલંકૃત મહાકાવ્ય તરીકે

(4) Kiratarjuniya – as an ornate epic.

૬ કિરાતાર્જુનીય (સર્ગ-૧-૨)માં નિરૂપિત રાજનીતિ ચર્ચો. ૧૧

**6** Discuss the politics as depicted in the Kiratarjuniya (canto 1, 2). **11**

**અથવા / OR**

૬ કિરાતાર્જુનીયનો મૂળસ્રોત દર્શાવી તેમાં ભારવિએ કરેલાં પરિવર્તનો વિશે ચર્ચા કરો. ૧૧

6 Show the sources of Kirātārjunīya and discuss the changes made by Bharavi there in. **11**